
संस्कृत-त्रैमासिक-पत्रिका,
वार्षिक रु-१५०

ISSN 2321-1342

# देवसायुज्यम्

वर्ष-०९, जनवरी-मार्च-२०१६
अङ्कः-६७




परोपकाराय फलन्ति वृक्षाः ।

सम्पादकः डॉ.प्रफुल्लः पुरोहितः

संपादक : डॉ. प्रफुल्लः पुरोहितः

प्रकाशकः
डॉ. प्रफुल्लः पुरोहितः
एल-२, न्यू विक्रम बाग,
लेक्चरर्स क्वार्टर्स,
एम.एस.यु. प्रतापगंज, वडोदरा-२.
मो. ९३७६२१९४७७

परामर्शकमण्डलम्
डॉ. जयन्तीलाल के. भट्टः
डॉ. जयदेव ए. जानी
डॉ. राजेन्द्र नाणावटी
श्री हंसकुमार मांकड
डॉ. उमा देशपांडे
डॉ. रमणलाल पाठक

मुद्रक
Disha Art
New Sama Road,
Vadodara-390 024
M : 9925382863

## अनुक्रमणिका


| | | | |
|---|---|---|---|
| १. | मन्त्रः | | २ |
| २. | पर्णस्य मूल्यं कियत् ? | सतीशः गज्जर् | ३ |
| ३. | वेदपरिचयः | स्व.मुकुन्द लालजी वाडेकरः | ४ |
| ४. | श्रीमद्भगवद्गीतायाः समाजस्योपरि प्रभावः।। | डॉ.ललितः पटेलः | ६ |
| ५. | दार्शनिकदृष्ट्या गोतत्त्वम् ।। | बी.उमामहेश्वरी | ७ |
| ६. | वैदिकवाङ्मये पर्यावरणचिन्तनम् | र्डा.भूपेन्द्रकुमार राठौर | १० |
| ७. | पाणिनीयसिद्धहेमचन्द्रशब्दानुशासनयोः सन्धिप्रकरणस्य तुलना । | शुक्लः राहुलः | १२ |
| ८. | वार्षिकोत्सवः | सम्पादकः | १३ |
| ९. | भारतीयज्योतिषे भास्करकमलाकरयोः सृष्टिविमर्शः | उमा शंकर झा | १४ |
| १०. | परिसंवादः | | १५ |
| ११. | वर्तमानकाले यज्ञचिकित्सायाः महत्त्वम् ।। | डॉ.घनश्याम भोजविया | १६ |
| १२. | ग्रीष्मर्तुः | स्व. पं. परीक्षित् शर्मा | २१ |
| १३. | सम्मानः | डॉ. अमृतः भोगायता | २३ |
| १४. | न स्त्री स्वातन्त्र्यमर्हति ।। | सुभाषः वसोया | २४ |
| १५. | परमात्मपंचविंशतिका ।। , ।। परमज्योतिः पञ्चविंशतिका ।। | महोपाध्यायश्रीयशोविजयपादाः | २६ |
| १६. | वैदिकसंहितासु वास्तुशास्त्रम् | डॉ.प्रफुल्लः पुरोहितः | २७ |
| १७. | शब्दकोषः | | ३१ |
| १८. | ग्रीष्मः | डॉ.प्रफुल्लः पुरोहितः | ३२ |
| १९. | शिक्षाया उद्देश्यम्, सुभाषितम् | | ३४ |
| २०. | सूक्तयः | | ३५ |
| २१. | संस्कृतभाषा, कूटम् | | ३६ |
| २२. | अष्टमवार्षिकपदवीदानसमारम्भः तथा अन्ताराष्ट्रिय-संस्कृतसङ्गोष्ठ्याः उद्घाटनसमारोहः | डॉ.ललितः पटेलः | ३७ |
| २३. | हेमचन्द्रसमारोहः, लोकार्पणम्, योगवसिष्ठमधिकृत्य सङ्गोष्ठी सम्पन्ना | डॉ.नौनिहालगौतमः | ३९ |
| २४. | समापनसमारोहः | श्रीनवलकिशोरपन्तः | ४० |
| २५. | परिसंवादः, कार्यशाला | सम्पादकः | ४१ |
| २६. | द्विदिवसीया समाजोपयोगिविशिष्टव्याख्यानमाला | सम्पादकः | ४२ |

# ।। दार्शनिकदृष्ट्या गोतत्त्वम् ।।

माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। अर्थात् गौः रुद्राणां माता, वसूणां पुत्री, अदितिपुत्राणां स्वसा, धृतरूपामृतस्य मध्यभागः वर्तते । अतः गौः सदा वन्दनीया पूजनीया च वर्तते । वैदिककालादारभ्यैव गौः अस्माकं भारतीयधर्मस्य संस्कृतिसभ्यतानां च प्रतीकरूपेण वर्तते । स्वयं वेद एव गां प्रति नमस्कारं प्रकटयति यथा - अघ्ने ! ते रूपाय नमः। रूपायाघ्ने ते नमः[1] इति । तथा शास्त्रेषु गोः तत्त्वं महत्त्वञ्च मुक्तकण्ठेन गीतं वर्तते -

मातरः सर्वभूतानां गावःसर्वसुखप्रदाः। गावो यज्ञस्य हि फलं गोषु यज्ञाः प्रतिष्ठिताः॥
यद् गृहे दुःखितागावः स याति नरकं नरः। एतद्वै विश्वरूपं हि विश्वरूपं गोरुपकम् ॥

गावो विश्वस्य मातरः इत्यादि वचनैः गोः जननीजन्मभूम्योः यादृशं स्थानं वर्तते तादृशं स्थानं दत्तं वर्तते । पृथिव्याः रूपमपि गोरूपमेवेति वेदेषु बहुत्र सन्दर्भानुसारं गोः वर्णनं कृतमस्ति । तेनेदं ज्ञायते यत्, गौःसर्वप्राणिनां आधारभूता माता । तथा सर्वसुभकार्येषु पञ्चगव्यैः अर्थात् गोः क्षीरम्, गोः दधि, गोः घृतम्, गोमूत्रम्, गोमयानां स्वीकारः अनिवार्यः भवति ।

न्यायशास्त्रे उपमानप्रमाणनिरुपणावसरे उपमितिस्थापनायै लौकिके सुप्रसिद्धोदाहरणरूपेण गौः एव स्वीकृतमस्ति । यद्यपि सन्ति तत्र अन्यान्यपि उदाहरणानि, तथापि गौः एव उदाहरणरूपेण स्वीकृत्य उपमानप्रमाणं निरूपितम् । तथा सर्वशास्त्राणां मूलस्तम्भभूतं लक्षणम् । तल्लक्षणस्वरूपकथनार्थमपि गोः उदाहरणमेव स्वीकृतं वर्तते । तत्र लक्षणं नाम कथं भवेदिति जिज्ञासायां लक्षणस्य लक्षणमुक्तं, अव्याप्त्यतिव्याप्त्यसम्भरूपदोषत्रयरहितं लक्षणं" भवेदिति । तत्र का नाम अव्याप्तिः इत्यत्र लक्ष्यैकदेशाऽवृत्तित्वं" इति लक्षणमुक्त्वा तदुदाहरणं गोः कपिलत्वं इति प्रतिपादितम् । तथा अतिव्याप्तेः लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वमि"ति लक्षणमुक्त्वा यथा गोः श्रृङ्गित्वम् इति प्रदर्शितम् । ततः असम्भवस्य लक्ष्यमात्राऽवृत्तित्वमि"ति लक्षणं प्रतिपाद्य यथा गोः एकशफत्वमिति दोषत्रयं प्रतिपाद्य एतादृशदोषत्रयरहितं असाधारणधर्मः"[2] लक्षणमेव लक्षणं भवति यथा गो सास्नादिमत्त्वम् इति प्रतिपाद्य लक्षणस्य लक्षणे स्पष्टतां कारितवन्तः। अर्थात् गोपदं, गोस्वरूपम्, गोलक्षणानि सर्वाण्यपि अस्माभिः पूजनीयानीति सङ्क्षेपार्थः।

भगवतः आदिशङ्कराचार्यस्यानुसारं गोः सेवा सर्वैः करणीया इति । यद्यप्ययम् आचार्यः अद्वैती वर्तते, तथापि स्वविरचितग्रन्थेषु सर्वत्र गोमहिमायाः गानं कृतं वर्तते । ब्रह्मानन्दप्राप्त्यै गोसेवायाः सर्वोपरिसाधनत्वमङ्गीकृतम् । उपनिषदः कथयन्ति यत् सत्यकामजाबालिमुनेः परमात्मसाक्षात्कारः गोसेवया क्षिप्रमेव जातम् इति । तद्यथा शङ्कराचार्यस्य वचनेषु, तमेतं श्रद्धातपोभ्यां सिद्धं वायुदेवता दिक्सम्बन्धिनी तुष्टा सति ऋषभमनुप्रविश्यर्षभभावमापन्नानुग्रहाय । अथ हैनमृषभोऽभ्युवादाभ्युक्तवान् सत्यकाम ३ इति सम्बोध्य तमसौसत्यकामो भगव इति ह प्रतिसुश्रावप्रतिवचनं ददौ । प्राप्ताःसौम्य सहस्रं स्मः, पूर्णा तव प्रतिज्ञा, अतः प्रापयनोऽस्मानाचार्यकुलम्" इति । अत्रायं भावः यत्, गुरुणादिष्टः सत्यकामः यावत्

पर्यन्तं गवां सङ्ख्या एकसहस्रं न जातं तावत् पर्यन्तं गुरोः कुटीरं न प्रत्यागतवान् । यदा एकसहस्रगावः सम्पन्नाः, तदा आश्रमं जगाम । तदा तेनकृत अत्यन्तादभुतश्रद्धापूर्णगोसेवां दृष्ट्वा स्वयं **ब्रह्मविद्यैव** गोः रूपं धृत्वा तं सत्यकामं ब्रह्मविद्यामुपदिदेश - **ब्रह्मा** चतुष्पादः, षोडशकलायुक्तः। तस्य पूर्वं दिशः विशुद्धज्ञानेन प्रकाशस्वरूपाः आसन् सूर्यः, चन्द्रः, अग्नि"रित्यादिदेवताः सर्वे अनेनैव प्रकाशिताः।

यदादित्यगतं तेजः जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धिमामकम् ॥[3] इति सच्चिदानन्दपरमात्मनः स्वरूपमुपदिदेश"। उपदेशानन्तरं सत्यकामः आश्रममगच्छत् । तदा गुरुणा हरिद्रुमगौतमेन प्रोक्तम्, हे शिष्य ! भवतः मुखे ब्रह्मवर्चःविराजते । अतः मन्ये भगवतः प्राप्तिः पूर्णतया प्राप्ते"ति । ततः भगवता उक्तमस्ति, प्रसन्नेन्द्रियः प्रहसितवदनश्च निश्चिन्तः कृतार्थो भह्नविद्भवति"[4] इति । अर्थात् ब्रह्मविदेव ब्रह्मज्ञानेन प्रशान्तचित्तः तेजोमुखश्च प्रतिभासते इति । तथा क्षीरवत् द्रव्यस्वभावविशेषादुपपद्यते"। यथा हि लोके क्षीरं जलं वा स्वयमेव दधिहिमभावेन परिणमतेऽनपेक्ष्य बाह्यं साधनं तथेहापि भविष्यति ।

**ननुक्षीरादपि दध्यादिभावेन परिणममानमपेक्षत । एवं बाह्यं साधनमौष्ण्यादिकम्** "[5] इति । अर्थात् यथा क्षीरं विना अन्यसहकारेण दधि सञ्जायते, यथा-जलं विना अन्यसाहाय्यं हिमं भवति तथा परमात्मापि स्वयं संसाररूपेण परिणमते । तथा परिणमितुं कस्याप्यन्यवस्तुनः आवश्यकता नास्ति ।

**यथोऽर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति ।**

यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम्"[6] इत्येवं प्रकारेण तेषामनुयायिनः अपि रत्नप्रभा, न्यायनिर्णयः, भामती, वेदान्तकल्पतरुः, परिमलादि टीकाग्रन्थेषु गोः तथा गोक्षीरविषये च सविस्तरेण विवरणं दत्तमस्ति । तथा प्रतिदिनमस्माभिरभ्यस्यमानोऽयं श्लोकः अत्यन्तं प्रसिद्धं वर्तते -

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः। पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥ अर्थात् सर्वे उपनिषदः गो समानाः उपनिषद्यां व्याख्याकारः दोग्धा स्वयं गोपालनन्दनः भगवान् श्रीकृष्णः, श्रोता वत्सा च पार्थः, तत्र भोक्तारः सधियः पण्डिताः, तत्र दुग्धं गीतामृतमेवेति गीतासारं कथयित्वा गोः माहात्म्यमत्यन्तसूक्ष्मतया प्रोक्तमस्ति ।

**सर्वे देवाः स्थिताः देहे सर्वदेवमयी हि गौः" अर्थात् गोः शरीरे सर्वे देवताः स्थिताः सन्ति । अतः गौः सर्वदेवस्वरूपिणी इति । तथा -**

**सर्वे देवा स्थिताः गवामङ्गे तीर्थानि तत्पदेषु च ।**
**तद्गुह्येषु स्वयं लक्ष्मीस्तिष्ठत्येव सदा पितः।।**

गोष्पदाक्तमुदा यो हि तिलकं कुरुते नरः। तीर्थस्नातो भवेत् सद्यो जयस्तस्य पदे पदे ॥ गावस्तिष्ठन्ति यत्रैव तत्तीर्थं परिकीर्तितम् । प्राणांस्त्यक्त्वा नरस्तत्र सद्यो मुक्तो भवेद् ध्रुवम् ॥[7] इति शम् ।

**बी.उमामहेश्वरी**

शेषभागः २३ पृ. क्रमांके (सन्दर्भ सूचिः)